# Shri Shivapanchachamara Stotram

# શ્રીશિવપઞ્ચચામરસ્તોત્રમ્

## Document Information

Text title : Shri Shivapanchachamara Stotram 02 12

File name : shivapanchachAmarastotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-12

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીશિવપઞ્ચચામરસ્તોત્રમ્

સુવર્ણપદ્મિનીતટાન્તદિવ્યહર્મ્યવાસિને
    સુપર્ણવાહનપ્રિયાય સૂર્યકોટિતેજસે ।
અપર્ણયા વિહારિણે ફણાધરેન્દ્રધારિણે
    સદા નમઃ શિવાય તે સદાશિવાય શમ્ભવે ॥ ૧॥

સુતુઙ્ગભઙ્ગજહ્નુજાસુધાંશુખણ્ડમૌલયે
    પતઙ્ગપઙ્કજાસુહૃત્કૃપીટયોનિચક્ષુષે ।
ભુજઙ્ગરાજકુણ્ડલાય પુણ્યકાલિબન્ધવે
    સદા નમઃ શિવાય તે સદાશિવાય શમ્ભવે ॥ ૨॥

ચતુર્મુખાનનારવિન્દવેદગીતભૂતયે
    ચતુર્ભુજાનુજાશરીરશોભમાનમૂર્તયે ।
ચતુર્ગુણદ્વિરષ્ટકપ્રકારચિત્રકેલયે
    સદા નમઃ શિવાય તે સદાશિવાય શમ્ભવે ॥ ૩॥

શરન્નિશાકરપ્રકાશમન્દહાસમઞ્જુલા-
    ધરપ્રવાલભાસમાનવક્ત્રમણ્ડલશ્રિયે ।
કરસ્ફુરત્કપાલમુક્તવિષ્ણુરક્તપાયિને
    સદા નમઃ શિવાય તે સદાશિવાય શમ્ભવે ॥ ૪॥

સહસ્રપુણ્ડરીકપૂજનૈકશૂન્યદર્શના-
    સહસ્વનેત્રકલ્પિતાર્ચનાચ્યુતાય ભક્તિતઃ ।
સહસ્રભાનુમણ્ડલપ્રકાશચક્રદાયિને
    સદા નમઃ શિવાય તે સદાશિવાય શમ્ભવે ॥ ૫॥

સહસ્રહલ્લવીરભદ્રસિંહનાદગર્જિતા
    શ્રુતિપ્રભેદદક્ષયાગભો??સ્મના ।
(??)
    સદા નમઃ શિવાય તે સદાશિવાય શમ્ભવે ॥ ૬॥

રસારથાય રમ્યપત્રભૃદ્રથાઙ્ગપાણયે
    ધરાધરેન્દ્રચાપશિઞ્જિનીકૃતાનિલાશિને ।
સુસારથીકૃતાનુજાનુ વેદરૂપવાદિને
    સદા નમઃ શિવાય તે સદાશિવાય શમ્ભવે ॥ ૭॥

મૃકણ્ડુસૂનુરક્ષણાવધૂતદણ્ડપાણયે
    સુખણ્ડમણ્ડલસ્ફુરત્પ્રભાજિતામૃતાંશવે ।
અખણ્ડભોગસમ્પદર્થલોકભાવિતાત્મને
    સદા નમઃ શિવાય તે સદાશિવાય શમ્ભવે ॥ ૮॥

મધુરિપુવિધુશક્રમુખ્યદેવૈ-
    રપિ નિયમાર્ચિતપાદપઙ્કજાય ।
કનકગિરિશિરાસનાય તુભ્યં
    રજતસભાપતયે નમઃ શિવાય ॥ ૯॥

॥ ઇતિ શ્રીશિવપઞ્ચચામરસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Shivapanchachamara Stotram*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*